Journal of Advances in Developmental Research (IJAIDR)
E-ISSN: 0976-4844 ● Website: www.ijaidr.com ● Email: editor@ijaidr.com

# वैदिक शिक्षा पद्धतिः – एकं अध्ययनम्

**जसराम बैरवा**

सहायक आचार्य, संस्कृत
राजकीय कन्या महाविद्यालय, नादौती, करौली

**सारांश**

**"पडङ्गो वेदोऽध्येयः ज्ञेयश्च " इति श्रुति वाणी। षडङ्गश्च छन्दः; कल्पः; ज्योतिषम्, निरुक्तम्, शिक्षा, व्याकरणमिति । एतानि चाङ्गानि वेदपुरुषस्य पादादिस्थानरूपत्वेन संस्तूयन्तेऽन्यत्र। तेषूक्तेषु षडङ्गेषु मध्ये "शिक्षाघ्राणमित्यनेन" उदितशिक्षायाः ईश्वरोच्वास निःश्वासात्मकतयोपवर्णितवेदस्य इतराङ्गापेक्षया परममहत्वपूर्णत्वमुद्‌घोषितम्। एवं रूपा च शिक्षा प्रतिवेदं भिन्ना भिन्ना वहुभिः पूर्वजैरुपदिष्टा। तासु कृष्णयजुपि तैत्तिरीये सुगमज्ञानाय वह्वयः शिक्षाः सन्ति। तास्वपि महत्वपूर्णत्वेन प्रधानतया नवशिक्षाः। यथा -**
**प्रथमा व्यासशिक्षा च लक्ष्मीशिक्षा द्वितीयका ।**
**भारद्वाजि तृतीयाचं शिक्षाऽऽरण्या तुरीयका।।**
**पञ्चमी शम्भु शिक्षाच षष्ठी चापिशली तथा ।**
**सप्तमी पाणिनेः शिक्षा अष्टमी कौहली तथा।।**
**वासिष्ठी नवमी चैवं नवशिक्षाः प्रकीर्त्तिताः ।।**
**एतेषु शिक्षाग्रन्थेषु वर्णाः, तेषां स्थानकरणप्रयत्नविशेषाः, वर्णेच्चारणपद्धतिः, वर्णागमः, वर्णविकाराः, वर्णलोपः, स्वरसन्ध्यादिविशेषाः इत्यादयः नैके विषयाः प्रतिपादिताः। ते विषयाः अस्मिन् शेधपत्रे किञ्चित् विव्रियते ।**

**कूटशब्दः शिक्षा, वर्णोत्पत्तिः, वर्णोच्चारणम्, हस्तस्वरः**

**प्रस्तावना**

वेदस्य अङ्गसहितस्य ब्रह्मसाक्षात्कार एव परमप्रयोजनम् । वेदपुरुषस्य षडङ्गानि पाणिनीयशिक्षायां स्पष्टमुच्यन्ते –
छन्दः पादौ तु वेदस्य हस्ती कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।
एतेन च स्पष्टीभवति यत् वेदस्य अङ्गैस्सह अङ्गाङ्गिभावरूपसम्बन्धः वरीवर्तीति । तत्र शिक्षायाः, शिक्ष्यते स्थानादिकम् अनया (शिक्ष 2 विद्योपादाने, गुरोश्च हलः ।।- इत्यप्रत्ययः) इति व्युत्पत्तिमनुसृत्य प्रथमं स्थानम् इतरवेदाङ्गापेक्षया । शिक्षाया मूलमस्ति तैत्तिरियोपनिषदि शीक्षावल्लीनामके शीक्षां व्याख्यास्यामः। वर्णस्वरः । मात्रा वलम् । साम सन्तानः । इत्युक्तश्शीक्षाध्यायः इति। स्वर्ग लोके च शिक्षोक्तप्रकारेण प्रयुक्तस्यैव फलशालित्वमुक्तं वेदे । तच्च वचनं महाभाष्ये पूर्वपरयोः ।। इति सूत्रे पतञ्जलिना, पस्पशायां कैयटेन च प्रादर्शि-एकः

एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति। सुप्रयुक्तः इत्यस्य शिक्षोक्तरीत्या प्रयुक्त इत्यर्थः । रामायणे सुन्दरकाण्डे संस्काररहिताया वाचः अर्थान्तरगमकत्वं वर्णयामास वाल्मीकिः-
दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम् ।
संस्कारेण यथा हीनां वाचमर्थान्तरं गताम्।।
कालिदासश्च कुमारसम्भवे तमेव भावं दृढीचकार-
संस्कारवत्येव गिरा मनीषी, तया स पूतश्च विभूषितश्च ।।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ।।
अत्र व्याकरणम् उपलक्षणं शिक्षायाः। शिक्षाधीनत्वात् । उच्चारणस्य
यत्किञ्चिन्यूनातिरिक्तं पङ्क्तिशच्छिक्षाग्रन्थैः समुल्लसति गीर्वाणवाणी वैदिकी लौकिकी च। तत्र वर्णानां स्वराणां च संख्याविषये मतभेदः संलक्ष्यते शिक्षाग्रन्थेषु । तथाऽपि सधूलतया शिक्षाकाराणाम् ऐकमत्यम् अस्त्येव । सत्स्वपि वहुषु शिक्षाग्रन्थेषु पाणिनीयशिक्षैव प्रायेण सर्वैरपिआद्रियते। तत्र तामेव स्वीकृत्य केचन मुख्याः विषयाः पत्रेऽस्मिन् प्रस्तूयन्ते।

**वर्णोत्पत्तिः**

परमर्षिणा पाणिनिना वर्णेत्पत्तिः स्पष्टरूपेण अभाषि -
आत्मा वुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।' मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् । सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ।।१
विदुषा नागेशभट्टेन लघुशब्देन्दुशेखरे संज्ञाप्रकरणे श्लोकौ इमौ एवं व्याख्यातौ
आत्मा अन्तःकरणं संस्काररूपेण स्वगतानर्थान् बुद्ध्या स्ववृत्त्या समेत्य एकबुद्धिविषयान् कृत्वा तद्बोधनेच्छया मनः युक्तं करोति। तदिच्छावन्मनः कायाग्निं जाठरमग्निम् अभिहन्ति । स कायाग्निः। सोदीर्णः। स मारुतः उदीर्णः। ऊर्ध्वं प्रेरित इत्यादिस्तदर्थः। एवञ्च शब्दप्रयोगेच्छया उत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात्प्रेरितः वायुः वेगान्मूर्धपर्यन्तं गत्वा प्रतिनिवृत्तौ वक्त्रं प्राप्य उक्तयत्नसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति।
हिमवान् पार्वत्या पूतः विभूषितश्च इत्यर्थः । कश्चन पिता पुत्रं शास्ति-
यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम् ।

**वर्णोच्चारणम्**

व्याघ्री पुत्रान् दंष्ट्रभ्यां नयेत् भीता सती पतनभेदाभ्याम् अपीडयन्ती च । तद्वत् नाव्यक्ताः न वा पीडिताः वर्णाः प्रयोक्तव्या इति सोपमं वर्णोच्चारणविधिः न्यरूपि आचार्येण पाणिनिना। अनेनैव प्रकारेण इतरैः शिक्षाकारैः -
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न तु पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ।।
एवं वर्णानां प्रयोगेण ब्रह्मलोकप्राप्तिरवाप्यते इत्यपि आचार्येण अगादि -
एवं वर्णाः प्रयोक्तव्याः नाव्यक्ताः न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ।।
तत्रैव शिक्षायाम् अधमपाठकाः निरुक्ताः -
गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च पडेते पाठकाधमाः ।।

तत्र लिखितपाठकत्वं साम्प्रदायिकैः प्रायेण नाङ्गीक्रियते-
पुस्तकस्था च या विद्या परहस्ते च यद्धनम् ।
कार्यकाले समायाते न सा विद्या न तद्धनम् ।।

माधुर्यादयः गुणाः पाठकस्य षडिति अजीगणत् पाणिनिः-
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ।।
सामान्येन उच्चारणे लक्ष्यमाणानपि शङ्कामीत्यानुनास्यादीनपि स्पष्टताप्रतिपत्तये अजगणदाचार्यः-
दोषान्
शङ्कितं भीतमुद्धृष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसिगं तथा स्थानविवर्जितम् ।।
उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं न वदेन दीनं न तु सानुनास्यम् ।।
त्रिषष्टिः चतुष्षष्टिर्वा वर्णाः इति व्यक्तीकरोति पाणिनिः-
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ।।
त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ।।
अत्यन्तमप्राप्तौ विधिः ।
स्वर-काल-स्थान-प्रयत्नानुप्रदानं पुरस्कृत्य वर्णविभागः पञ्चधा कृतः-
स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ।।
तत्र अचर्चा स्वरं उदात्तानुदात्तस्वरितरूपम् अनुसृत्य स्वरा इति नाम। संज्ञाप्रकरणे लघुशब्देन्दुशेखरे नागेशभट्टश्चैवं व्याचरख्यौ -अचः स्वरा' इति । उदात्तदिभिः स्वयमेव राजन्ते इति व्युत्पत्तेः (महाभाष्ये) तद्धर्मत्वादुदात्तादयोऽपि स्वरा इत्युच्यन्ते । "उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः" इति पाणिनिः सूत्रयामास अचामेव कालतो ह्रस्वदीर्घप्लुता इति संज्ञाः -
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ।।
अत्र अष्टाध्याय्यां पाणिनिः सूत्रमकरोत् "ऊकालोज्झस्वदीर्घप्लुतः इति । उ, ऊ, उ३ इति
कुक्कुटरुतानुकरणम्। तावानेव कालः ह्रस्वदीर्घप्लुतामिति अक्षरार्थः । अत्रास्ति
याज्ञवल्क्यशिक्षा -
एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् ।।
गान्धर्ववेदप्रसिद्धाः
निषादर्षभगान्धारादिस्वराः
उदात्तादिस्वरत्रयनिदाना इति व्यवृणोत् पाणिनिः-
उदात्ते निषादगान्धारौ अनुदात्त ऋषभधैवतौ ।

स्वरितप्रभवा होते षड्ङ्गमध्यमपञ्चमाः ।।
स्वराणां संख्याविषये मतभेदः दरीदृश्यते पञ्च इति नारदीयशिक्षा । सप्त इति महाभाष्ये पतञ्जलिः । तथापि सर्वे ते उक्तस्वरत्रयप्रभेदा इति वोध्यम् । वर्णानाम् अष्टौ स्थानानीत्यपि स्पष्टीचकाराचार्यः-
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ।।
अपराह्णः, मध्याह्नः, ब्राह्मणः, बाह्यम्, प्रह्लादः, आह्वानम् इत्यादिशब्देषु प्रायेण दुरुच्चारणमेव श्रुण्मः। हकारः कण्ठ्यः । किन्तु यदा वर्गपञ्चमाक्षरैः अन्तस्थाभिश्च (यरलवाः अन्तस्थाः) संयुतः तदा तं हकारम् औरस्यम् (उरसि भवम्) विजानीयात् - इदं च स्पष्टमभ्यधायि पाणिनिना अन्यैश्च शिक्षाकारैः-
हकारं पञ्चमैर्युक्तम् अन्तस्थाभिश्च संयुतम् ।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ।।
स्वरतः वर्णतो वा हीनः मन्त्रः मिथ्याप्रयुक्तस्सन् यजमानं हन्तीति वक्ति पाणिनिः-
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।

शतपथब्राह्मणे अयं मन्त्रः दृश्यते
अथ यदब्रवीत् - इन्द्रशत्रुर्वर्धस्वेति तस्मादु हैनमिन्द्र एव जघान । अथ यद्ध शश्वदवक्ष्यत् -

इन्द्रस्य शत्रुर्वर्धस्वेति शश्वदुह स इन्द्रमेवाहनिष्यत् ।

**तत्र सायणेनेत्थं भाष्यमभाषि**
स त्वष्टा ग्रहप्रचारसमये इन्द्रशत्रुरिति पूर्वपदोदात्ततया इन्द्रः शत्रुर्यस्येति बहुव्रीहिसमासं कृत्वा मन्त्रं प्रयुक्तवान् अतस्तम् 'इन्द्रो जघान' । यद्यसौ अन्तोदात्ततया तत्पुरुषसमासेन वा इन्द्रस्य शत्रुरिति व्यस्तनिर्देशेन वा ब्रूयात, तदा निश्चितमेव स इन्द्रं हन्यात् ।
अत्र महाभाष्यपाठं "दुष्टः शब्दः स्वरतो वर्णतो वा" इत्यादि स्वीकृत्य कैयटेन पस्पशायाम् एवं व्याख्यातम् दुष्टः शब्द इति । स्वरेण स्वरतः, आद्यादित्वात् तसिः । मिथ्याप्रयुक्त इति । यदर्थप्रतिपादनाय प्रयुक्तः ततोऽर्थान्तरं स्वरवर्णदोषात् प्रतिपादयन् नाभिमतमर्थमाहेत्यर्थः । वागेव वज्रो हिंसकत्वात् । यथा इन्द्रशत्रुशब्दः स्वरदोषात् यजमानं हिंसितवान् इत्यर्थः । इन्द्रस्य अभिचारः वृत्रेण आरब्धः । तत्र "इन्द्रशत्रुर्वर्धस्व" इति मन्त्र ऊहितः । तत्र इन्द्रस्य शमयिता वा भव इति क्रियाशब्दोऽत्र शत्रुशब्द आश्रितः न तु रूढिशब्दः । तस्याश्रयणे हि वहुव्रीहितत्पुरुषयोः अर्थभेदः । तत्र इन्द्रामित्रत्वे सिद्धे सति इन्द्रस्य शत्रुर्भव' इत्यत्र अर्थ प्रतिपाद्ये अन्तोदात्ते प्रयोक्तव्ये आद्युदात्त ऋत्विजा प्रयुक्त इति अर्थान्तराभिधानात् इन्द्र एव वृत्रस्य शातयिता संपन्नः । इन्द्रशत्रुत्वस्य च विधेयत्वात् बोधनविभक्तेः अनुवाद्यत्वात् इहाभावः । यथा राजाभव युध्यस्व इति । ऊह्यमानस्य च अमन्त्रत्वात् "यज्ञकर्मणि" इति जपादिपर्युदासेन मन्त्राणामेकश्रुतिर्विधीयमाना नेह भवति ।

नारदीयशिक्षायां तावत् वेदे गान्धर्ववेदे लोके च उपयुज्यमानाः वृत्तयः द्रुतमध्यविलम्विताख्याः निरुक्ताः-
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्विताम् ।।

अयं विषयः "तपरस्तत्कालस्येति" सूत्रे महाभाष्ये पतञ्जलिनाऽपि अस्पर्शि । द्रुतायां सुषुम्नानाडीतः नवविन्दवः स्रवन्ति, मध्यामायां द्वादश विलम्बितायां पोडश चेति विशेषः । पस्पशायां च भाष्यकारेण स्पष्टमवोचि यत्पुरा कल्पे उपनयनसंस्कारोत्तरकालं ब्राह्मणाः शिक्षाव्याकरणे अधीत्य वेदमधीयन्ते स्म । गच्छति काले वेदमधीत्य विवाहादौ त्वरिता उक्ताङ्गयोरनादरं प्रकटीकुर्वन्ति स्म। एवं च प्रायेण सर्वास्वपि शिक्षासु उपर्युक्तविषयाणां चर्चा संलक्ष्यते । सन्ति चान्ये विशेषाः ।।

## सन्दर्भ

1. शिक्षासंग्रहः - संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८९.
2. व्याकरणमहाभाष्यम् पतञ्जलिः, चौखम्बा, वाराणसी, १९८४.
3. रामायणम् रामायणतिलक- रामायणशिरोमणि गोविन्दरजीयरामायणभूषणेतिटीकात्रयोपेतम्, प्रिंटिंग प्रेस, मुम्बापुरी, १८१२.
4. कुमारसम्भवम्, तुकाराम् जवाजी, मुम्बयी, १८९३.
5. लघुशब्देन्दुशेखरः गुजराती नागेश भट्टविरचितः ताता सुब्रह्मण्यशास्त्रिकृतगुरुप्रसादव्याख्यासहितः स्वादिसन्ध्यन्तः प्रथमो भागः आन्धविश्वकलापरिषत्, कुम्भघोणम, १९४१.
6. शतपथब्राह्मणम् श्रीमत्सायणाचार्यकृतवेदार्थप्रकाशनाभाष्येण सहितम, सामश्रमीत्युपनामाचार्य सत्यव्रतशर्मणा सम्पादितम, प्रथमकाण्डात्मकः प्रथम भागः, वङ्गदेशीयास्यायितिसमितिः (Asiatic Society of Bengal), कालीकोठा, १९०३. ७. तैत्तिरीयारण्यकोपनिषद्भागः, कार्पोरेषन् मुद्रणालयः, मैसूर १९८०
7. पा. शि. 41, 42
8. पा० सू० 3.3.103
9. तै. आ. 1.2
10. पा०सू० 6.1.84
11. रा. सु. काण्डे 5.25.39
12. कुमारसम्भवम् - 1.28 उत्तरार्धम्
13. पा. शि - 6
14. पा. शि 7
15. पा. शि9
16. T.-25
17. पा. शि 31
18. पा. शि 32
19. पा. शि - 33
20. पा. शि 34
21. पा. शि 35
22. पा. शि – 2-3 23. पा. शि 10
23. लघुशब्देन्दुशेखरः पृ० 142
24. महाभाष्ये 1.229, 30, 31
25. पा. सू. 1.2.28
26. या. शि 13

27. पा. शि-12
28. पा. शि 13
29. पा. शि-52
30. पा.सू.1.1.60